# सिद्धान्तकौमुदी - २

Program in which it is offered: [Integrated Masters – Vyākaraṇa]

**Course Category: [Core]** **Schedule of offering: 3**

**Course Credit Structure: [5]**

- **Lecture: [5]**
- **Tutorial: [none]**
- **Practical: [none]**

**Contact Hours per week: [5]**

## 1. Introduction

व्याकरणशास्त्रस्य प्रतिपाद्येषु अंशेषु शब्दसिद्धिप्रक्रिया प्रधानभूता वर्तते । एकस्य शब्दस्य सिद्धौ अष्टाध्याय्याः विभिन्नेभ्यः प्रदेशेभ्यः सूत्राणि आदाय तेषु तेषु प्रसङ्गेषु कार्याणि करणीयानि भवन्ति । सैषा दुर्गमा विविधशब्दसिद्धिप्रक्रिया वैयाकरणप्रवरेण भट्टोजिदीक्षितेन सिद्धान्तकौमुद्याख्ये ग्रन्थे सुगमतया बोधिता । अपि च बहुषु प्रदेशेषु सूत्रवार्तिकभाष्याणां मतेषु भेदे दृश्यमाने यथोचितं सर्वमतानुकूलः अन्यतममतानुकूलो वा पन्थाः अनुसरणीयो भवति यः अल्पमतिभिः ग्रहीतुं न शक्यते । भट्टोजिदीक्षितेन तादृशानि स्थलानि न्यक्षेण परिशील्य सिद्धान्तभूतः अर्थः स्वग्रन्थेऽस्मिन् प्रकाशितः । तस्मात् वैयाकरणप्रक्रियया साधुशब्दस्वरूपस्य निर्णये अयं ग्रन्थः नितरामुपकारकः वरीवर्ति ।

अत्र अजन्तस्त्रीलिङ्गप्रकरणम्, अजन्तनपुंसकलिङ्गप्रकरणं, हलन्तपुंलिङ्गप्रकरणं, हलन्तस्त्रीलिङ्गप्रकरणं, हलन्तनपुंसकलिङ्गप्रकरणम्, अव्ययप्रकरणं च इत्येते भागाः अध्याप्यन्ते । तत्र उपकारकाणां व्याख्याभागानामपि यथोचितं बोधनं भविष्यति ।

## 2. Course Objectives

अनेन क्रमेण अध्ययनस्य अन्ते छात्राः –

- स्त्रीपुंनपुसंकलिङ्गेषु सर्वेषां प्रातिपदिकानां सर्वेषु सुप्-प्रत्ययेषु रूपाणि निष्पादयितुं समार्थाः भवेयुः
- अनुवृत्त्यादिज्ञानपूर्वकं सूत्रार्थावगमे तद्व्याख्याने च पाटवं प्राप्नुयुः

- प्रकृतग्रन्थभागं प्रतिपङ्क्ति अधीत्य कस्यापि भागस्य व्याख्याने समर्थाः भवेयुः

## 3. Pre-requisites

- प्रकृतग्रन्थभागोपयोगिन्याः अष्टाध्याय्याः धारणा
- इतः पूर्वतनस्य ग्रन्थभागस्य सम्यक् अध्ययनम्
- सन्धिकार्याणां समासानां च ज्ञानम्

## 4. Readings

- सिद्धान्तकौमुदी, मोतिलाल बनरसीदास, भागः - १

## 5. Module-wise topics

The suggested structure is as follows:

**Module 1 – अजन्तस्त्रीलिङ्गप्रकरणम् अजन्तनपुंस्कलिङ्गप्रकरणं च** 20 sessions

**Objectives –**

- अजन्तस्त्रीलिङ्गानां अजन्तनपुंसकलिङ्गानां च शब्दानां सुबन्तरूपसिद्धिप्रक्रिया
- प्रकरणान्तर्गतानां सूत्राणामर्थस्य अवबोधः
- एतस्मिन् विभागे विद्यमानां सूत्राणां सुष्ठु व्याख्याने सामर्थ्यम्

**Topics –**

- आकारान्ताः, इकारान्ताः, ईकारान्ताः इत्यादयः अजन्ताः स्त्रीलिङ्गशब्दाः
- अजन्ताः नपुंसकलिङ्गाः शब्दाः

**Module 2 – हलन्तपुंलिङ्गप्रकरणम्** 30 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- सर्वेषां हलन्तानां पुंलिङ्गशब्दानां सुबन्तरूपसिद्धिः
- ग्रन्थगतानां विषयाणां निरूपणे सामर्थ्यावाप्तिः

**Topics –**

- हलन्तशब्दानां सुबन्तरूपसिद्धिः
- पदकार्याणि भकार्याणि च
- अङ्गकार्याणि
- युष्मदस्मदादेशाः

**Module 3 – हलन्तस्त्रीलिङ्गप्रकरणं हलन्तनपुंसकलिङ्गप्रकरणं च** 15 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- पाणिनीयप्रक्रियानुसारं तत्तच्छब्दनिष्पादने सामर्थ्यम्
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- हलन्तस्त्रीलिङ्गाः
- हलन्तनपुंसकलिङ्गाः
- नुमागमः

**Module 4 – अव्ययप्रकरणम्** 5 sessions

**Objectives –**

- एतद्भागान्तर्गतानां सर्वेषां सूत्राणाम् अर्थावबोधः
- अव्ययरूपाणां निष्पादने सामर्थ्यम्
- एतद्भागान्तर्गतानां सूत्राणां विवरणे सामर्थ्यम्

**Topics –**

- स्वरादयः, निपाताः, अव्ययीभावः, कृदव्ययानि, तद्धिताव्ययानि

## 6. Pedagogy

अध्यापनपद्धतिः प्रायेण उपन्यासरूपा अभ्यासरूपा च भवति । अयं विषयः प्रक्रियाबहुलः इति कारणतः लेखनफलकस्य अधिकतया उपयोगः करिष्यते । ग्रन्थाध्ययनावसरे अपेक्षितानां भागानां व्याख्यानमपि बोधयिष्यते ।

## 7. Learning Outcome

एतं ग्रन्थभागमधीतवन्तः छात्राः अत्रत्यानां सर्वेषां सूत्राणामर्थं, तल्लाभप्रकारं च सम्यक् ज्ञात्वा तैः लक्ष्यसंस्कारं च कृत्वा सर्वेषाम् अजन्तानां हलन्तानां च प्रातिपदिकानां सुबन्तरूपाणि निष्पादयितुं शक्ष्यन्ति । सूत्राणामर्थस्य, प्रक्रियायाः ग्रन्थस्थानां शास्त्रीयविचाराणां च मौखिकनिरूपणे समर्थाः भविष्यन्ति ।

## 8. Evaluation Pattern

- कार्यसमर्पणम् २० अङ्काः
- प्रस्तुतिः १५ अङ्काः
- सत्रार्धपरीक्षा २५ अङ्काः
- सत्रान्तपरिक्षा ४० अङ्काः